# શ્રીસ્મરણાષ્ટકમ્

shrIsmaraNAShTakam

sanskritdocuments.org

March 17, 2018

shrIsmaraNAShTakam

# શ્રીસ્મરણાષ્ટકમ્

## Sanskrit Document Information

Text title : smaraNAShTakam

File name : smaraNAShTakam.itx

Category : vishhnu, krishna, puShTimArgIya, aShTaka, haridAsa

Location : doc_vishhnu

Author : haridAsa

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

shrIsmaraNAShTakam

# શ્રીસ્મરણાષ્ટકમ્

યદીયસૌભાગ્યભરેણ ગોકુલ-
સ્ત્રિયો ન યોગ્યાનિ વચાંસિ સત્પતેઃ ।
ન માનયામાસુરુદારમાનસા-
સ્તદઙ્ઘ્રિસેવાસમયં સ્મરામિ ॥ ૧॥

યદ્રૂપસૌન્દર્યવશીકૃતાશયા
મૃગીગણાઃ પૂજનમાદધુર્મુદા ।
હિત્વા સમીપસ્થિતભર્તૃભીતિં
તદઙ્ઘ્રિસેવાસમયં સ્મરામિ ॥ ૨॥

યદ્વેણુનાદશ્રવણૈકજાત-
ભાવાઙ્કુરા દેવવધૂસમૂહાઃ ।
પ્રવૃદ્ધભાવા મુમુહુઃ સભર્તૃકા-
સ્તદઙ્ઘ્રિસેવાસમયં સ્મરામિ ॥ ૩॥

યત્પાદસઞ્ચારણજાતકામ-
ભાવા યદઙ્કેન નયત્યતલ્પામ્ ।
શાન્તિં વિચિત્રા વ્રજભૂમિરેષા
તદઙ્ઘ્રિસેવાસમયં સ્મરામિ ॥ ૪॥

યદ્બાલલીલાકૃતચૌર્યજાત-
સન્તોષભાવા વ્રજગોપવધ્વઃ ।
ઉપાલભન્તે સમયં યમર્ભકં
તદઙ્ઘ્રિસેવાસમયં સ્મરામિ ॥ ૫॥

યં ગોપનારીગણદર્શનીય-
લીલં મુદા ગોસુતપુચ્છકર્ષુકમ્ ।
પ્રેક્ષન્ત્ય એવોજ્ઝિતગેહકૃત્યાઃ
તઙ્ઘ્રિસેવાસમયં સ્મરામિ ॥ ૬॥

યદ્બાહુસંસ્પર્શનજાતભાવ-
રસાલવાવર્તુલભૂતવિગ્રહઃ ।
ગોવર્ધનો વેદ ન વૃષ્ટિપાતં
તદઙ્ઘ્રિસેવાસમયં સ્મરામિ ॥ ૭॥

યદધરસઙ્ગતવેણુનિનાદં
વિહિતવિષયસુખભરનિર્વાદમ્ ।
શ્રુતવત્યો મુખભક્ષ્યા ગાવઃ
કિં ન હિ કુરુતે તદ્ગતભાવઃ ॥ ૮॥

ઇતિ શ્રીહરિદાસોદિતં સ્મરણાષ્ટકં સમાપ્તમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIsmaraNAShTakam*
pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*